# Shri Saketanivasacharyavirachitah Brahmapadashaktivadah

# શ્રીસાકેતનિવાસાચાર્યવિરચિતઃ બ્રહ્મપદશક્તિવાદઃ

## Document Information

Text title : Shri Saketanivasacharyavirachitah Brahmapadashaktivadah

File name : brahmapadashaktivAdaHsAketanivAsAchArya.itx

Category : raama, rAmAnanda, dashaka

Location : doc_raama

Author : sAketanivAsAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીસાકેતનિવાસાચાર્યવિરચિતઃ બ્રહ્મપદશક્તિવાદઃ

(શ્રીટીલાચાર્ય)

રામં ગુણાર્ણવં વન્દે સર્વશ્રુતિસમન્વિતમ્ ।
જગજ્જન્માદિહેતું ચ પરબ્રહ્મપદેરિતમ્ ॥ ૧॥

બ્રહ્મસૂત્રકૃતં વન્દે મહર્ષિં બાદરાયણમ્ ।
તથા બોધાયનં શ્રીમદ્વૃત્તિકૃત્ પુરુષોત્તમમ્ ॥ ૨॥

આનન્દભાષ્યકૃદ્રામાનન્દાચાર્યં યતીશ્વરમ્ ।
આચાર્યવાસવં નત્વા ગુરુદેવં નમામ્યહમ્ ॥ ૩॥

વાદિવાદસુવિભ્રાન્તજનાનાં ભ્રાન્તિનાશકમ્ ।
શક્તિવાદમિમં કુર્વે બ્રહ્મશબ્દાર્થબોધકમ્ ॥ ૪॥

શક્તિશ્ચ બ્રહ્મશબ્દસ્યાદ્વૈતિનાં ચ મતે યતઃ ।
સિધ્યતિ ન ક્વચિત્ તસ્માત્ તદ્વરં નહિ, તદ્યથા ॥ ૫॥

અથાતો બ્રહ્મજિજ્ઞાસે તિ સૂત્રઘટકસ્ય હિ ।
બ્રહ્મશબ્દસ્ય શક્તિશ્ચ ક્વચિદસ્તિ ન વા મતા ॥ ૬॥

વિચારાવિષયે ચાદ્યેઽથેતરસ્મિન્ નુ સા મતા ।
શુદ્ધે ચોપહિતે ચાદ્યે, નાદ્યઃ, કસ્માત્ તદુચ્યતે ॥ ૭॥

શ્રુત્યુક્તં ચ બૃહત્વાદિ નિમિત્તં નાસ્તિ તત્ર યત્ ।
સર્વવિવર્ત્તમૂલત્વાદસ્તિ તદિતિ ચેન્ન હિ ॥ ૮॥

મુક્તાવપિ ચ તદ્યોગાન્મુક્ત્યભાવો ભવેત્ તથા ।
ઉપલક્ષયિતું બ્રહ્મ નિરુક્તિર્નનુ તાદૃશી ॥ ૯॥

વિશેષણત્વેઽપિ યસ્માદ્ બાધો ન દૃશ્યતે ।
પ્રવૃત્તિનિમિત્તત્વેન બૃહત્વાદિ શ્રુતૌ સ્મૃતૌ ॥ ૧૦॥

પરં બ્રહ્મ પરં ધામ પવિત્રં પરમં ભવાન્ ।

ઉપપન્ના સ્તુતિશ્ચેયં નિર્વિશેષે ભવેન્ન હિ ॥ ૧૧॥

બ્રહ્મણિ નિર્વિશેષે તચ્છક્તિર્મન્તું ન શક્યતે ।
પ્રમાણાભાવતસ્તત્ર પક્ષશ્ચાન્ત્યો ન સમ્મતઃ ॥ ૧૨॥

અન્યસ્મિન્ સ્વીકૃતા સૈવં ત્વભિધાતું ન શક્યતે ।
નિર્નિમિત્તે ભવેત્ સા ચેદસાધુત્વં ભવેત્ તદા ॥ ૧૩॥

સનિમિત્તે ભવેચ્ચેત્ સાઽતિપ્રસઙ્ગો દુરુદ્ધરઃ ।
તસ્માચ્ચ બ્રહ્મશબ્દસ્ય નાન્યસ્મિન્નભિધા મતા ॥ ૧૪॥

અથ ચેદ્ બ્રહ્મશબ્દસ્ય કુત્રચિન્નાભિધા મતા ।
હન્તૈવં બ્રહ્મશબ્દસ્યાસાધુત્વમાપતેદ્ ધ્રુવમ્ ॥ ૧૫॥

સાધુત્વં ચ મૃષા તસ્માદિષ્ટાપત્તિર્મતે મમ ।
મૈવં સકલશબ્દાનામસાધુત્વં યતસ્તથા ॥ ૧૬॥

બ્રહ્મણિ લક્ષણા ચાપિ બ્રહ્મશબ્દસ્ય નો મતા ।
શક્યસમ્બન્ધરૂપા યલ્લક્ષણા સર્વસમ્મતા ॥ ૧૭॥

તતશ્ચ બ્રહ્મશબ્દસ્ય શક્તિદોષવિવર્જિતે ।
દિવ્યદેહે ગુણાબ્ધૌ ચ રામે બ્રહ્મણિ સમ્મતા ॥ ૧૮॥

શ્રીજાનકીપતેરેવ વેદને સકલેશિતુઃ ।
વાક્યે “તમેવ” ચેત્યાદૌ શ્રુતા મુક્તેરુપાયતા ॥ ૧૯॥

સદાચાર્યસુરેન્દ્રશ્રીટીલાચાર્યવિનિર્મિતઃ ।
ભવતાચ્છક્તિવાદોઽયં ભ્રાન્તાનાં ભ્રાન્તિનાશકઃ ॥ ૨૦॥

ઇતિ શ્રીસાકેતનિવાસાચાર્યવિરચિતઃ બ્રહ્મપદશક્તિવાદઃ સમ્પૂર્ણઃ ।

Encoded and proofread by Mrityunjay Pandey

*Shri Saketanivasacharyavirachitah Brahmapadashaktivadah*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*